# Gaekwad's Oriental Series

No. XVIII.

# वाराहगृह्यसूत्र

# VÂRÂHAGṚHYASÛTRA

CENTRAL LIBRARY, BARODA.

P. P. Ac. Gunratnasuri M.S.

Jin Gun Aaradhak Trust

GAEKWAD'S ORIENTAL SERIES No. XVIII
PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJA GAEKWAD OF BARODA

# वाराहगृह्यसूत्र

# VÂRÂHAGṚHYASÛTRA

EDITED BY

R. SAMA SASTRY, B. A.

*Curator, Government Oriental Library, Mysore*

२० ०/४/०

CENTRAL LIBRARY

BARODA

1921

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press, 23, Kolbhat Lane,
Bombay, and Published by Newton M. Dutt, Acting Curator of State Libraries,
for the Baroda Government

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# INTRODUCTION.

Among the S'rauta works of the Yajurveda, the Vârâha S'rauta, together with its Gṛihya-Sūtra, seems to be the latest. In contrasting the Yajus with what is termed Mantras and Kalpas, it cites the authority of Patanjali and Bâdarâyaṇa. Unlike the other S'rauta-writers, the author of the Vârâha S'rauta divides the S'ruti into two portions, the Injunction (*Vidhi*) and Flattery (*Arthavâda*) and shows his thorough acquaintance with the technicalities of the Mîmânsâ of Jaimini. In the Pariśishṭa of his S'rauta Sûtra, the contents of which are briefly enumerated in the Pariśishṭa of the Gṛihya Sûtra, the author devotes as many as eighteen Khaṇḍas or chapters to the description of what in the Mîmânsâ are termed as Guṇavidhi, Chodanavidhi, Prayojanavidhi, Âdes'a-Vidhi and other distinguishing features of the Vedic texts. It follows therefore that the author of the Vârâha S'rauta and Gṛihya Sûtras, whatever might be his name, was later than Patanjali, Jaimini, and Bâdarâyaṇa. It is not very difficult to determine the later limit of his times. In the fifteen chapters of what is called Gṛihyapurusha, which forms part of the Pariśishṭa of the Vârâhas'rauta, the author treats of some other domestic rites not noticed in this and other Gṛihyasûtras proper. Among other rites treated of here, the offering of Akshata saktu or coloured rice and flour to the snakes in the month of S'râvaṇa, the offering of rice cooked with sesamum powder to Indra and Indrâṇi, in the full moon of the month of Phálguna, the riding on horses on the full moon of Âśvayuja, the rite of Âgrahâyaṇi, the S'râddha to the ancestors in the Aparapaksha and a horse-sacrifice to Yama, Varuṇa, Kubera, and Âśvins in the month of Âśvayuja, are described in detail. Later in the same Pariśishta expiatory rites to avert calamities due to the birth of a son in the stars, Mulá and Âślesha, are also laid down. In none of these portions, the author refers to S'iva, Vishṇu, Gaṇeśa and other later gods, nor to the zodiacal divisions of Mesha, Vṛishabha and others, as is done by Yájnavalkya and other Smriti-writers of the third or fourth centuries A. D. From this it follows that the details of astrology as described in the Bṛihajjâtaka of Varâhamihira, and the zodiacal divisions mentioned in the Âryabhatîya at the close of the fifth century A. D., were unknown to the author of the Vârâha Gṛihya.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Moreover the slaughter of a cow or bull in the Madhuparka treat given to the learned guests and the bridegroom on the day of marriage, is made optional in this Gṛihya. But in the Yâjnavalkya, Yama, and other Smṛitis, which date from the 3rd century of the Christian era, it is stated that a cow or bull is to be gifted rather than slaughtered. Hence it follows that the author of the Gṛihya flourished in the transition period of the first and second centuries A. D., when, under the influence of Buddhism, cow-killing for flesh-eating was about to disappear. Hence the Vârâha S'rauta and Gṛihya sûtras may be regarded as a work or rather compilation made in the first or second century A. D. Since both the S'rauta and the Gṛihya rites treated of in these works are almost similar to those of Âpastamba, Baudhâyana, Hiraṇyakes'i and others of the Yâjusha schools, this Maitrâyaṇîya S'rauta must necessarily have been in observance long before the compilation of the work. Hence it is not at all an original work written for the first time in the first few centuries of the Christian era; but rather it was reduced to writing or systematically arranged for oral teaching at that time.

What is particularly interesting in the S'rauta is the Paris'ishṭa portion referred to in the Gṛihya. This occupies as much as the S'rauta proper, ending with the Horse-sacrifice and Sattras as in other S'rauta works. It is in this portion of the work that the S'ulba, dealing with the construction of altars, the Pras'na treating of the methods of interpreting the Vedas, the Draviṇa, describing the sacrificial instruments and vessels, the Gonâmika dealing with the rites performed for the prosperity of cows, and the C'handonukramaṇi, distinguishing the Mantra, Brâhmaṇa, Yajus, Kalpa, Metres and other matter, appear together with other most interesting customs and rites unnoticed in any other S'rauta works. Unfortunately, both of the two copies of the manuscript, which Mr. R. Ananta Krishna Sastry, the most energetic Pandit of the Gaekwad Central Library at Baroda, has secured for that Library and handed over to me to edit for the *Gaekwad Oriental Series* are not merely corrupt, but are also incomplete on account of omission of a chapter or two here and there. It is beyond emendation, as no other work is found to deal with similar matter. Still I have done my best to restore the reading and to make it intelligible as far as possible.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Coming to Gṛihya portion under consideration, I had three manuscripts of the *Text* named A. B. and D. and a Paddhati named C. for the edition of the work. Of these, A. is complete and fair, but not free from clerical errors. The other two are incomplete and differ from A. in arrangement. B. contains only 16 khaṇḍas dealing with from Jâtakarma to Garbhâdhâna and omits Pumsavana, Sîmantonnayana at the end, and Rathâroha and Gṛihapraves'a in the middle. Nor are the Vais'vadevakhaṇḍa and Pâkayajnakhaṇḍa contained in it. D. contains only a very few khaṇḍas such as S'ravaṇa-karma, Chûḍâkarma, and Vratas. C. however is complete, but begins with Garbhâdhâna and ends with Gṛihapraves'a. It is neither a commentary nor merely a text of the Gṛihya. Besides quoting smṛitis here and there on the procedure of the details, it supplies an introduction to each Mantra naming the Ṛishi, C'handas, and Devatâs. It is, however, more corrupt than A.

The order of the rites both in A & B is as follows:—

( 1 ) Rite to be performed at the conception of a child
( 2 ) Rite to secure the birth of a male child
( 3 ) Parting of the pregnant wife's hair
( 4 ) Ceremony for the new-born child
( 5 ) Greeting the children after returning from journey
( 6 ) The feeding of the child
( 7 ) The tonsure of the child's head and shaving
( 8 ) The Initiation of the student
( 9 ) The four vratas or duties of the student
( 10 ) The Upâkarma and Utsarga
( 11 ) Godâna
( 12 ) Mekhalonmeka
( 13 ) Marriage
( 14 ) Election of a bride
( 15 ) Seizing of the bride's hand
( 16 ) The treading of the stone
( 17 ) Sacrifice of the fried grain
( 18 ) The seven steps
( 19 ) The bride's journey to the new home
( 20 ) Garbhâdhâna

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The paddhati, however, follows other Gṛihyasutras in beginning the Gṛihya rite with Garbhâdhâna and ending with Gṛihapraveśa. In the Gṛihya texts, it is, however, clear that the couple after Gṛihapraveśa had to spend one year or twelve *days* in observing Brahmacharya before performing the rite of Cohabitation. This implies that marriage of a grown up woman was a common custom in the days of the writers of the Gṛihyasûtras. When this custom disappeared, giving place to the new custom of marriage of *Kanyâs* or young girls in the first few centuries of the Christian era, the order of the Gṛihya rites seems to have been recast by the later Smṛiti-writers, making Garbhâdhâna the first rite and Gṛihapraveśa the last among the rites concerning man and woman. Evidently the implication is that there is a wide interval between the rites of Gṛihapraveśa and Garbhâdhâna. This seems to be the chief cause of the variation in the order of the Gṛihya rites enumerated in the Gṛihya sûtras.

The Vârâha Gṛihya differs from other Gṛihyas in that it contains a number of old Gâthâs not found elsewhere. A few old customs not found in other Gṛihyasūtras are also described here. The ascertainment of the suitability of a bride by observing what particular mud-piece she selects out of a number of pieces collected from various places, and the making of marriage agreement by both the parties with cow-dung in their hands, are two interesting customs peculiar to the Vârâha form of marriage. The eight or six varieties of marriage are not noticed here.

So far no Dharmasûtra of the Vârâha branch has as yet been discovered. With the laudable encouragement which His Highness the Gaekwad, the most enlightened Mâhârâja of Baroda, has been giving to the search, preservation and publication of ancient Sanskrit manuscripts in view of collecting materials for the formation of a Social, Political, and Literary History of India, the original home of learning, there is every likelihood of such valuable manuscripts being discovered in time to come.

The discovery of the Vârâha S'rauta and Gṛihya manuscripts was not an accident. Mr. R. A. Sastry of the Baroda Library is thoroughly familiar with the Charaṇavyûha Gaṇapâṭha, and argues that given certain manuscripts in the possession of some persons in a given locality, other manuscripts having indispensable

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

connection with the given manuscripts, must also be found in the same locality. Thus, expecting to find the Vârâha S'rauta and Gṛihya manuscripts in the possession of the Maitrâyaṇîya people in Nâsik and Khândesh, he succeeded in finding the S'rauta and Gṛihya manuscript (A) in the possession of one Yajneśvra Lakshman Paurâṇik of Nâsik (B) with S'ankar Balvanta Joshi and (D) with Tryambak Ramchandra Joshi, both of Nandurbâr. As Indian Pandits are generally reluctant to part with their manuscripts, Mr. Sastry, too, met at first with some difficulties in obtaining these manuscripts, but with his usual tact in such circumstances he succeeded. Indian Pandits have yet to learn that the only monument of India's ancient civilization is her ancient manuscripts; and that the only means of preserving that monument is the publication of those manuscripts before they fall a prey to white ants and worms.

*Mysore,*
*20th March, 1921.*

R. SAMA SASTRY.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# वाराहगृह्यसूत्रम्।

## जातकर्म।

प्राङ्मुखमुदङ्मुखं वा सूतिकालयं कल्पयित्वा ध्रुवं प्रपद्ये शुभं प्रपद्ये इति काले प्रपादयेत्। रेतो मूत्रमिति च्यावनीभ्यां दक्षिणकुक्षिमभिमृशेत्। श्रावयेद्वा पुत्रं जातमन्वक्षं स्नातं न मातोपहन्यात् आमन्त्रप्रयोगात्। अग्नेरभ्याहितस्य परिसमूढस्य परिस्तीर्णस्य पश्चादहते वाससि[1] कुमारं प्राक्शिरसमुत्तानं संवेश्य पालाशस्य मध्यमपर्णं प्रवेष्ट्य तेनास्य कर्णावाजपेत्। भूस्त्वयि दधामीति दक्षिणे भुवस्त्वयि दधामीति सव्ये स्वस्त्वयि दधामीति दक्षिणे भूर्भुवःस्वस्त्वयि दधामीति सव्ये। अथैनमभिमन्त्रयेत्—अश्मा भव परशुर्भव हिरण्यमस्तृतं[2] भव। वेदो[3] वै पुत्रनामासि स जीव शरदः शतं[3]। अङ्गादङ्गात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतमिति यत्र शेते तदभिमृशेत्। वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितं। वेदामृतस्य देवानहं पुत्रमहं हृदमित्याज्यं संस्कृत्य ब्राह्मणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा व्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात्। जयाभ्यातानानां राष्ट्रभृतश्चैके। कांस्ये चमसे वाहुतिसंपातानवनीय तस्मिन्सुवर्णं संनिघृष्य व्याहृतिभिः कुमारं चतुः प्राशयेदत्यन्तमेके सुवर्णप्राशनमुदके निघृष्य आद्वादशवर्षताया इषं पिन्वोर्जं पिन्वेति स्तनौ प्रदापयेत्। दक्षिणं पूर्वं सव्यं पश्चात् स्विष्टकृतं हुत्वा प्रायश्चित्ताहुतीश्च समिधमाधाय पर्युक्षति। एष कर्मान्तो बहिर्द्वारेऽग्निर्नित्यः। कणसर्षपयवानां होमः। व्याहृतिभिर्जुहुयात्। अप्रतिरथं जपेत्। इन्द्रो भूतस्येति षडर्चं च सूतिकालयं यथाकालं समन्तादुदकेन परिषिंचेत्॥

॥ इति वाराहगृह्यसूत्रे प्रथमः खण्डः ॥

---

1 वाससी—A. A 2 मश्रितं B मश्रुतं—C. 3 इदं A कोश एव दृश्यते.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## नामकरणम् ।

एवमेव दशम्यां कृत्वा पिता माता च पुत्रस्य नाम दध्यातां। घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं कृतं न तद्धितं द्व्यक्षरं चतुरक्षरं वा त्यक्तपितृनामधेयान्नक्षत्रदेवतेष्टनामानो वा। द्विनामा तु ब्राह्मणो नामैवं कन्याया अकारव्यवधानमाकारान्तमयुग्माक्षरं नदीनक्षत्रचन्द्रसूर्यपूषादेवदत्तरक्षितावर्जं। नवनीतेन पाणी प्रलिप्य सोमस्य त्वा द्युम्नेनेत्येनमभिमृशेत्। सर्वेषु कुमारकर्मसु आग्नेयः स्थालीपाकः प्राजापत्यो वा सर्वत्रानादेशेऽग्निः पुंसामर्यमा स्त्रीणाम्। संवत्सरं मातापितरौ न मांसमश्नीयाताम्॥

॥ इति वाराहगृह्ये द्वितीयः खण्डः॥

---

## पुत्राभिमन्त्रणमन्नप्राशनं च ।

पुत्रस्य जाते दन्ते यजेताग्निं गवाऽपशुना वा। विप्रोषितः प्रत्येत्य पुत्रस्य मूर्धानं त्रिराजिघ्रेत्—पशूनां त्वा हिंकारेणाभिजिघ्रामीति। जातकर्मवद्धस्ताङ्गुलीं प्रवेष्ट्य तेनास्य कर्णावाजपेत्। अथैनमभिमन्त्रयते—अश्मा भवेति अग्निधन्वन्तरी इति।[1] पुत्रवच्छागमेषाभ्यामिष्ट्वा दीर्घाणां व्याहृतिभिः कुमारं चतुः प्राशयेत्। आयुर्दा देवेति च कुमारकर्मणि शुक्ल उदगयने पुष्ये नक्षत्रे नवमीवर्जं सर्वे ऋतवो विवाहे माघचैत्रौ मासौ परिहाप्योत्तरं च नैवां[2]श्चमन्वारम्भयित्वा हवनम्॥

॥ इति वाराहगृह्ये तृतीयः खण्डः॥

---

## चूडाकरणम् ।

तृतीयवर्षस्य जटाः कुर्वन्ति यथा वा कुलकल्पः। अग्निमुपसमाधाय परिसमुह्य पर्युक्ष्य परिस्तीर्य दक्षिणतोऽग्नेर्ब्राह्मणमुपवेश्योत्तरत उदकपात्रं शमीशमकवत्। अथैनमभिमन्त्रयते—हिरण्यवर्णाः शुचय इति चतसृभिः या ओषधय इत्यनुवाकेन, शं नो

---

1 पुत्रवति. 2 नैनाद्य.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

देवीरभिष्टय इति, शं न आपो धन्वन्या इति द्वाभ्यामिति च । तासामुदकार्थान्कुर्वीत [1]पर्युक्षणे अभ्युन्दने स्नापने च । आज्यं संस्कृत्य ब्राह्मणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा अग्न आयूंषि पवस इति सप्तभिः सप्त जुहुयात् । आयुर्दा देवेति च ये केशिनः प्रथमे सत्रमासत येभिराभृतं यदिदं विराजति । तेभ्यो जुहोम्यायुषे दीर्घायुत्वाय स्वस्तय इति व्याहृतिभिश्चोक्तः कर्मान्तः पूर्वेण । शीतेन वा उदकेनेत्युष्णेन वा उदकेनेति तप्ता इतराभिः संसृज्य आर्द्रदानवस्थजीवदानवस्थोन्दतीषमावदेत्यपोभिमन्त्र्य अदितिः केशान् वपत्वाप उन्दन्तु जीवसे । दीर्घायुत्वाय स्वस्तय इति दक्षिणं केशान्तमभ्युन्दति । ओषधे त्रायस्वैनं इति दक्षिणस्मिन्केशान्ते ऊर्ध्वाग्रं दर्भमन्तर्दधाति । स्वधिते मैनं हिंसीरिति क्षुरेणाभिनिदधाति । येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्यायुष्मानयं जर[2]दष्टिर्यथासदहमसाविति प्रवपति । दक्षिणतो मातान्या वाऽविधवा आनडुहेन गोमयेन आ[3]भूमिगतान्केशान् परिगृह्णीयात् ।—मा ते केशान् अनुगाद्वर्च एतत्तथा धाता दधातु ते । तुभ्यमिन्द्रो वरुणो बृहस्पतिः सविता वर्च आदधुरिति प्रवपतोऽनुमन्त्रयते । तेन धर्मेण पुनरपोभिमन्त्र्यापरं केशान्तमभ्युन्द्यात् । उत्तरं च । अन्यौ तु प्रवपनौ । येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् । तेन ते वपाम्यायुषे दीर्घायुत्वाय स्वस्तय इति पश्चात् । येन भूयश्चरात्ययं ज्योक्च प[4]श्यति सूर्यं । तेन ते वपाम्यायुषे दीर्घायुत्वाय सुश्लोक्याय सुवर्चस इत्युत्तरतः । यत्क्षुरेण वर्तयता[5] सुपेशसा वप्तर्वपसि केशान् [6]शुन्धशिरो मुखं मास्यायुः प्रमोषीरिति लोहायसं क्षुरं केशवापाय प्रयच्छति । यथार्थं केशयत्नान् कुर्वन्ति—दक्षिणतः कपर्दो वसिष्ठानां उभयतोऽत्रिभार्गवकाश्यपानां पञ्चचूडाङ्गिरसां शिखिनोऽन्ये वाजि[7]मेके मङ्गलार्थं । त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं । यद्देवानां त्र्यायुषं तन्मे अस्तु शता-

1 वीतापर्यु. 2 जरदिष्टि—. 3 येन भूमि. 4 पश्यसि—B. 5 क्षुरेण पचता—B. 6 शुद्धः—.B क्षुरेण पर्चयता–. 7 शिखान्येषामेकेति—A.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

युषमिति शिरःप्रभृति परिगृह्य गोमयेन केशानुत्तरपूर्वस्यां गृह्-स्यामुष्यामन्तरा गेहात्पलदं निदध्यात् । अतिरिक्ते[1] वा वपने— उप्त्वाय केशान्वरुणस्य राज्ञो बृहस्पतिः सविता विष्णुरिंद्रः । तेभ्यो निधानं महदन्वविन्दन्नन्तरा द्यावापृथिव्योरवन्युरिति[2] । कर्त्रे वरं ददाति । पक्ष्मगुणं तिलपिशितं च केशवापाय प्रयच्छति । संवत्सरं माता नाम्लाय धारयेद्रोषाय नाश्नीयात् । लवणवर्जं तूष्णीं । कन्याया आहुतिवर्जं विदुषो ब्राह्मणार्थसिद्धिं वाचयेत् । एवमुत्तरेषु ॥

॥ इति वाराहगृह्ये चतुर्थः खण्डः ॥

---

## उपनयनम् ।

गर्भाष्टमे ब्राह्मणमुपनयेत् । षष्ठे सप्तमे पञ्चमे वा । ततो गर्भै-कादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यं । प्राक् षोडशाद्वर्षात् ब्राह्मण-स्यापतिता सावित्री । आद्विंशात् क्षत्रियस्य । आचतुर्विंशाद्वैश्यस्य । अतऊर्ध्वं पतितसावित्रीका भवन्ति । नैनान्याजयेयुः नाध्यापयेयुर्न विवहेयुः । अभ्यन्तरं जटाकरणं बहिरुपनयनमुक्तोऽग्निसंस्का-रः । ब्राह्मणस्य कुमारं पर्युप्तिनं स्नातमभ्यक्तशिरसमुपस्पर्शनकल्पे-नोपस्पृष्टमग्नेर्दक्षिणतोऽवस्थाप्य दधिक्राव्णो अकारिषमिति कुमारं दधि त्रिः प्राशयेत् । इयं दुरिक्तां[3] परिबाधमाना वरुणं पवित्रं पुनती न आगात् । प्राणापानाभ्यां बलमाभजन्ती शिवा देवी सुभगा मेखलेयं । ऋतस्य गोप्ती तपसश्चरित्री घ्नती रक्षः सहमाना अरातीः । सा मा समन्तमनुपर्येहि भद्रे धर्त्तारस्ते सुभगे मेखले मारिषामेति मौञ्जीं त्रिगुणां त्रिःपरिवीतां मेखलामाबध्नीत मौर्वीं धनुर्ज्यां क्षत्रियस्य शाणीं वैश्यस्य । उपवीतमसि यज्ञस्य त्वोपवीते-नोपव्ययामीति यज्ञोपवीतं । या अकृन्तन्या अतन्वन्यावन्या वाह-रन् । याश्चाग्न्या देव्योन्तानभितो ततन्था । तास्त्वा देव्यो जरसे

---

1 अरिक्तेन—A अरिक्ते. 2 द्यावापृथिवी अप्सु इति— C. B. C.
3 दुरुक्तात्परि—B.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संव्ययन्त्वायुष्मन्निदं परिधत्स्व वासः ॥ परिधत्त वर्चः शतायुषं दीर्घमायुः । शतं च जीव शरदः पुरूचीः सूनिचाय्यो विभजा यजीयान् ॥ इत्यहतं वास आच्छाद्य—मित्रस्य चक्षुर्धरुणं[1] बलीयस्तेजो यशःश्रीस्थविरं समिद्धं[2] । आनाहनस्यं वसनं जरिष्णु[3] परीदं वाज्यजिनं दधेहमिति कृष्णाजिनं च । आज्यं संस्कृत्य ब्राह्मणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वाष्टौ जटाकरणीयान् जुहुयात् । व्याहृतिभिश्चोक्तः कर्मान्तः पूर्वेण । कालाय वां गोत्राय वां जैत्राय वां मैत्राय[4] वामन्नाद्याय वां अवनेनिजेमीत्युदकेनाञ्जलिं पूरयित्वा सुकृताय वामिति पाणी प्रक्षाल्य इदमहं दुर्यमन्यानि प्लावयामीत्याचम्य निष्ठीवति । भ्रातृव्याणां सपत्नानामहं भूयासमिति द्वितीयं । प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता । आद्रश्चिद्यन्मन्यमानस्तिरश्चिद्राजा चिद्यन्भगं भक्षीमहीत्याहेत्यादित्यमुपतिष्ठेत । ब्रह्मचर्यमुपागामुपमाह्वयस्वेति ब्रूयात् । एहि ब्रह्मोपेहि ब्रह्म ब्रह्म त्वा संब्रह्म सन्तमुपनयाम्यहमसाविति । अथास्याभिवादनीयं नाम गृह्णाति । देवस्य त्वेति हस्तं गृह्णाम्यहमसावित्यस्य हस्तं दक्षिणेन दक्षिणमुत्तानमभि[5] वाङ्गुष्ठमभि[6] वा लोमानि[7] गृह्णीयात् । ममेवान्वेतु ते मनो मामेवाऽपि त्वमन्विहि । अग्नौ घृतमिव दीप्यतां हृदयं तव यन्मयि ॥ इत्येनं संप्रेक्षमाणं समीक्षते । पृष्ठतोऽस्य पाणिमन्वाहृत्य हृदयदेशमन्वारभ्य जपति प्राणानां ग्रन्थिरसि स ते मा विस्रंसदिति । ब्रह्मणो ग्रन्थिरसि इति नाभिदेशं । गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं । इति प्रदक्षिणमग्निं परिणयेत् । पश्चादग्नेः दर्भेषूपविशति दक्षिणतश्च ब्रह्मचारी—अधीहि भोः । इत्युपविश्य जपति । प्रभुज्य दक्षिणं जानुं पाणी संधाय दर्भहस्तावोमित्युक्त्वा व्याहृतिभिः सावित्रीं चानुब्रूयात् । एवं काण्डानुवचनेषु ॥ तत्सवितुर्वरेण्यमिति गायत्रीं ब्राह्मणाय, देवो याति

---

1 धरुणं—B. 2 स्थविरं च दिष्ठयं. 3 आनाहतस्य व्यसनं च शुष्मं—B.
4 वामौद्देत्राय—A. B. 5 मभीवा—A. 6 मभिव—A. 7 लोमानि नाम A.

सविता सुरत्न इति त्रिष्टुभं क्षत्रियाय, युंजते मन इति जगतीं वैश्याय पच्छोर्धर्चशः सर्वामन्ततः । पालाशं दण्डं ब्राह्मणाय प्रयच्छति नैयग्रोधं क्षत्रियाय आश्वत्थं वैश्याय । सुश्रवः सुश्रवसं मां कुरु यथा त्वं सुश्रवः सुश्रवा अस्येवमहं सुश्रवः सुश्रवा भूयासं । यथा त्वं देवानां वेदस्य निधिगोपोस्येवमहं मनुष्याणां ब्रह्मणो निधिगोपो भूयासमिति दण्डं प्रतिगृह्णाति । ऊर्ध्वकपालो ब्राह्मणस्य कमण्डलुः परिमण्डलः क्षत्रियस्य निचलकलो[1] वैश्यस्य । इमा आपः प्रभराम्ययक्ष्माय यक्ष्मचातनीः । ऋतेनापः प्रभराम्यमृतेन सहायुषा । इति प्रतिगृह्णामीति प्रतिगृह्य भैक्ष्यचर्यं चरेत् । —ॐ भवति भिक्षां देहीति ब्राह्मणः । भवतिमध्यां क्षत्रियः । भवत्यन्तां वैश्यः । चतस्रष्षडष्टौ वाऽविधवा अप्रत्याख्यायिन्यो मातरं प्रथममेके । गुरवे निवेद्य वाग्यतः प्राग्ग्रामात् सन्ध्यामुपास्ते । तिष्ठन् पूर्वां सावित्रीं त्रिरधीत्य अध्वनामध्वपते श्रैष्ठ्यः स्वस्त्यस्याध्वनः पारमशीय । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुवाम शरदः शतं । प्रब्रवाम शरदः शतं अदीनाः स्याम शरदः शतं । भूयश्च शरदः शतात् । या मेधा अप्सरस्सु गन्धर्वेषु च यन्मनः । दैवी या मानुषी मेधा सा मा माविशतामिहैवेति प्रत्येत्याग्निं परिचरेत् । इमं स्तोममर्हत इति परिसमूहेत् । एधोस्येधिषीमहीति समिधमादधाति । समिदसि समेधिषीमहीति द्वितीयं ॥ आपो अद्यान्वचारिषमित्युपतिष्ठते । मा संसृज वर्चसेति मुखं परिमृजीत यदग्ने तपसा तपो ब्रह्मचर्यमुपेयमसि । प्रिया श्रुतस्य भूयासमायुष्मंतः सुमेधसः । अग्ने समिधमहारिषं बृहते जातवेदसे । स मे श्रद्धां च मेधां च जातवेदाः प्रयच्छतु स्वाहेति समिधमादधाति । तेजसा मा समङ्ग्धि वर्चसा मा समङ्ग्धि ब्रह्मवर्चसेन मा समङ्ग्धि इति मुखं परिमृजीत । आयुर्दा अग्नेऽसीति च यथारूपं गात्राणि संमृशति इह धृतिरिति पर्यायैः अंसग्रीवाश्च त्रिरालभ्य ऋचं नो धेहीति ललाटमभिमृशेत् । आद्यन्तयोः पर्युक्षणं । गुरवे ब्रह्मणे च वरमुत्तरासङ्गं

1 निचलको—B.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

च ददाति । द्वादशरात्रमक्षारलवणमाशेदक्षारमेके । व्युष्टे द्वादशरात्रे षड्रात्रे वा ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य पश्चात्पालाशस्य यज्ञियस्य वा वृक्षस्य सावित्रेण स्थालीपाकेनेष्ट्वा जयप्रभृतिभ्यश्चाज्यस्य पुरस्तात्स्विष्टकृतो मेखलां दण्डं चाप्सु प्रास्येत् । तत्रैव हविश्शेषं भुंजीतेति श्रुतिः ॥

॥ इति वाराहगृह्ये पञ्चमः खण्डः ॥

---

## व्रतानि ।

उपनयनप्रभृति व्रतचारी स्यात् । उपनयने व्रतादेशा व्याख्याताः ॥

मार्गवासाः[1] ।

संहृतकेशः ।

भैक्षाचर्यवृत्तिः ।

सशल्कदण्डः ।

सप्तमौञ्जीं मेखलां धारयेत् ।

आचार्यस्याप्रतिकूलः सर्वकारी ।

यदेनमुपेयात् तदस्मै दद्यात् ।

बहूनां येन संयुक्तः[2] ।

नास्य शय्यामाविशेत् ।

न रथमारोहेत् ।

न संविशेत् ।

न विहारार्थो जल्पेत् ।

न रुच्यर्थं कंचन धारयेत् ।

सर्वाणि सांस्पर्शकानि स्त्रीभ्यो वर्जयेत् ।

न स्नायाद्दण्डवत् ।

नोदकमभ्युपेयात् ।

न दिवा स्वपेत् ।

---

1 मृगाजिनवासाः. 2 बहूनामाचार्याणां मध्ये येन संयुक्तस्तस्मै दद्यात्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रैविद्यकं ब्रह्मचर्यं चरेत् ।
इन्द्रियसंयतः ।
सायं प्रातर्भैक्षाचर्यवृत्तिः ।
सायं प्रातरग्निं परिचरेत् ।
अधःशय्या ।
आचार्याधीनवृत्तिः ।
तन्निसर्गादशनं ।
अयाचितमलवणं ।
वाग्यतोऽश्नीयात् ।
मधुमांसे वर्जयेत् ।
आच्छिन्नवस्त्रां विवृतां स्त्रियं न पश्येत् ।
यौपस्य वृक्षस्य दण्डी स्यात् ।
नानेन प्रहरेद्भवे न ब्राह्मणाय ।
न नृत्यगीते गच्छेत् ।
न चैने कुर्यात् ।
नावलिखेत् ।
शिखाजटः सर्वजटो वा स्यात् ।
शाणं क्षौममजिनं वासः ।
रक्तं वसनं ।
कम्बलमैणेयं ब्राह्मणस्य ।
रौरवं क्षत्रियस्य ।
आजं वैश्यस्य ।

एतेन धर्मेण द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् । चतुर्विंशति द्वयोः षट्त्रिंशत्त्रयाणां । अष्टचत्वारिंशत्सर्वेषां । यावद्ग्रहणं वा सरज्जुरलंकृतकुशस्स्नात्वा स सर्वं लभेत यत्किंचिन्मनसेप्सितं । इत्येतेन धर्मेण साध्वधीते । मन्त्रब्राह्मणान्यधीत्य कल्पं मीमांसां च याज्ञिकोऽधीत्य वक्रं पदं स्मृतिं चैच्छिकः । तौ स्नातकौ श्रोत्रियोन्यो वेदपाठी । न तस्य स्नानं उपविश्याचमनं विधीयते । अन्तर्जानु बाहू कृत्वा त्रिराचामेत् । द्विःपरिमृजेत् । खानि चोपस्पृशेच्छीर्षण्यानि ॥

॥ इति वाराहगृह्ये षष्ठः खण्डः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## श्रावणीकर्म ।

वर्षासु श्रवणेन स्वाध्यायानुपाकरोति हस्तेन वा। प्रौष्ठपदीमित्येके। अथ जुहोति। अघानामासि तस्यास्ते जोष्ट्रीं गमेयं । अहमिद्धि पितुः परिमेधा अमृतस्य जग्रभ। अहं सूर्य इवाजनि स्वाहा। युक्तिर्नामासि योगो नामासि मतिर्नामासि । तस्यास्ते जोष्ट्रीं गमेयं तस्य ते जोष्ट्रं गमेयं । इति सर्वत्रानुषजति । युजे स्वाहा । प्रयुजे स्वाहा । संयुजे स्वाहा । उद्युजे स्वाहा । उद्युज्यमानाय स्वाहा–इति जयप्रभृतिभिश्चाज्यस्य पुरस्तात् स्विष्टकृतोऽन्तेवासिनां योगमिच्छन्नथ जपति। ऋतं वदिष्यामि सत्यं वदिष्यामि ब्रह्म वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारं वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि वेदस्य वाणीस्थ उपतिष्ठन्तु छन्दांस्युपाकुर्महेऽध्यायान् भूर्भुवः स्वरिति दर्भपाणिः त्रिस्सावित्रीमधीत्यादितस्त्रीननुवाकान् तथाङ्गानामेकैकं को वो युनक्तीति च ।

तस्यानध्यायाः समूहनवातो वल्मीकक्षारप्रभृतिवर्षान् विद्योतमानस्तनयित्नुरिति श्रुतिः आकालिकं देवतुमुलं विद्युद्भ्वोल्कात्यक्षराश्शब्दाः आचारेणार्धपञ्चमान् मासानधीत्य पञ्चार्धषष्ठान्वा दक्षिणायनं वाधीत्य अथोत्सृजन्ति । एतेन धर्मेण ऋतमवादिषं सत्यमवादिषं । ब्रह्मावादिषं । तन्मावीत् तद्वक्तारमावीत् आवीन्मामावीत्तद्वक्तारं । वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि । वेदस्य वाणीस्थ प्रतिश्वसन्तु छन्दांस्युत्सृजामहेऽध्यायान् भूर्भुवःस्वरित्यन्तमधीत्य को वो विमुञ्चतीति च पक्षिणीं रात्रिं नाधीयीतोभयतः पक्षान्वा नात ऊर्ध्वं अभ्रेष्वाकालिकविद्युत्स्तनयित्नुवर्षं चाथोपनिषदर्हाः । ब्रह्मचारी सुचरितमेधावी कर्मकृद्धनदः प्रियो विद्यया वा विद्यामन्विच्छंस्तानि तीर्थानि ब्रह्मणो वेदस्य ब्रह्मचारित्वादयः ग्रहणे तीर्थान्युपायाः ॥

॥ इति वाराहगृह्ये सप्तमः खण्डः ॥

---

1 जोष्टं—C.

## चातुर्होत्रिकदीक्षा।

अथ चातुर्होत्रिकी दीक्षा । संवत्सरमाघारावाघार्याज्यभागौ हुत्वा चतुर्होतृन् स्वकर्मणे जुहुयात्। सहपञ्चहोत्रा षड्ढोत्रा सप्तहोतारमन्ततो हुत्वा व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत्। अथाग्निव्रताश्वमेधिकी दीक्षा संवत्सरं द्वादशरात्रं वा। आकूतमग्निमिति षड्हुत्वा व्रतं प्रदायादितोऽष्टावनुवाकाननुवाचयेत्। त्रिषवणमुदकमाहरेत्। त्रींस्त्रीन् कुम्भांस्त्रींश्च समित्फलान् भस्मनि शयीत । करीषे सिकतासु भूमौ वा नोदकमभ्युपेयात्। संवत्सरे समाप्ते घृतवतापूपेनाग्निमिष्ट्वा वात्सप्रं वाचयेत् स्नातेन यावदध्ययनं काण्डव्रतविशेषो होमार्थश्च आद्यन्तयोर्जुहुयात्। अथैनं परिदत्ते अग्नये त्वा परिददामि। वायवे त्वा परिददामि। सूर्याय त्वा परिददामि। प्रजापतये त्वा परिददामीति। एतेनैवाश्वमेधो व्याख्यातः। नवमेनानुवाकेन हुत्वा दशमेनोपतिष्ठेत। अश्वाय घासमुदकस्थानं उदकं चाभ्युपेयात् । एताभ्यामेव मन्त्राभ्यां त्रैविद्यकं व्रतमुपेयात्। रहस्यमध्येष्यतः प्रवर्ग्यः । तस्य व्रतोपायनं समिन्मन्त्रश्च। तिष्ठेदहनि रात्रावासीत वाग्यतः । पर्वसु चैवं स्यात्। सर्वजटश्च स्यात्। संवत्सराद्वरः प्रवर्ग्यो भवति ॥

॥ इति वाराहगृह्ये अष्टमः खण्डः ॥

---

## गोदानम्।

षोडशवर्षस्य गोदानं। अग्निं वाऽध्येष्यमाणस्य अग्निगोदानिको[1] मैत्रायणीयजटाकरणेनोक्तमन्त्रविधिः[2] । उपस्थ उपकक्षयोश्चाधिको मन्त्रप्रयोगः । यत्क्षुरेण मर्चयतेति भूमौ केशान्निखनेत्। अन्ते गां दद्यात्। द्वे द्वे[3] गुरुणाऽनुज्ञातः[4] स्नायात्। छन्दस्यर्थान् बुध्वा स्नास्यन् गां कारयेत्। आचार्यमर्हयेत्। आपो हिष्ठेति तिसृभिः हिरण्यवर्णाः शुचय इति चतसृभिः स्नात्वा अहते

---

1 गोदानो—गोदानिके—B. 2 ञ्जटा कर्णेनो—A. 3 वेदे—A. 4 गुणानु—A.

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

वाससी परिददाति । वस्व्यसि वसुमन्तं मा कुरु । सौवर्चसाय मा तेजसे ब्रह्मवर्चसाय परिददामीति, विश्वजनस्य छायासीति छत्रं धारयते । मालामाबध्नीते यामश्विनौ धारयेतां बृहस्पतिः पुष्करस्रजं । तां विश्वेदेवैरनुमतां मालामारोपयामीति । हिरण्यं[1] बिभृयात् । प्रतिष्ठे स्थो देवते द्यावापृथिवी मा मा संताप्तमित्युपानहौ । विष्टम्भोसीति धारयेद्वैणवीं यष्टिं सोदकं च कमण्डलुम् । नित्यव्रतान्याहुराचार्याः द्विवस्त्रोत ऊर्ध्वं शोभनं वासो भर्तव्यमिति श्रुतिः । आमन्त्र्य गुरून् गुरुवधूंश्च[2] स्वान् गृहान् व्रजेत् । प्रतिषिद्धमपरया द्वारा निस्सरणं मलवद्वाससा सह संभाषा रजस्वद्वाससा सह शय्या-गोगुर्वोर्दु[3]रुक्तवचनमस्थाने शयनं स्मयनं स्थानं यानं गानं स्मरणमिति तानि वर्जयेत् । याजनं वृत्तिरुञ्छशिलमयाचितप्रतिग्रहः साधुभ्यो वा याचितमनायासेन सिध्यमानायां वा वैश्यवृत्तिः । स्वाध्यायविरोधिनोऽर्थान्विसृजेत् ॥

॥ इति वाराहगृह्ये नवमः खण्डः ॥

---

## विवाहः ।

विनीतक्रोधस्सहर्षः महिषीं भार्यां विन्देतानन्यपूर्वां यवीयसीं । असमानप्रवरैर्विवाह ऊर्ध्वं सप्तमात्पितृबन्धुभ्यः पञ्चमान्मातृबन्धुभ्यो बीजिनश्च । कृत्तिकास्वातिपूर्वैरिति वरयेत् । मृगशिरश्श्रविष्ठोत्तराणीत्युपयमेत् । पञ्च विवाहकारकाणि भवन्ति—वित्तं रूपं विद्या प्रज्ञा बान्धवमिति । एकालाभे वित्तं विसृजेत् । द्वितीयालाभे रूपं तृतीयालाभे विद्यां प्रज्ञायां तु बान्धवा विवदन्ते । अनृक्षरा ऋजवः सन्तु पन्था येभिस्सखायो यन्ति नो वरेयं । समर्यमा सं भगो नो निनीयात् सञ्जास्पत्यं सुयममस्तु देवाः इति वरकान्व्रजतोऽनुमन्त्रयते बन्धुमतीं कन्यामस्पृष्टमैथुनामुपयच्छेतानग्निकां । श्रेष्ठं विज्ञानमस्यै कुर्यात् । चतुरो लोष्टानाहरेत् । सीतालोष्टं वेदिलोष्टं गोमयलोष्टं स्मशानलोष्टं च एतेषामेकं गृहीष्वेति ब्रूयात् ।

---

1 तेजसीति हिरण्यं. 2 गुर्वेधीनांश्च. 3 गुरोर्दु—A गोगुरोर्दु—B.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्मशानलोष्टं चेद्गृह्णीयात् नोपयच्छेत्। असंसृष्टामघर्मेणोपयच्छेत्। ब्राह्मेण शौल्केन वा शतमिति रथं दद्याद्गोमिथुनं वा उभये[1] । तेजनीष्वासजत्[2] । जन्यान् कौमारिकांश्च । पूर्वे[3] जन्यास्स्युः अपरे कौमारिकाः चतुरो गोमयपिण्डान्कृत्वा द्वावन्येभ्यस्तथान्येभ्य इति प्रयच्छेत्[4] । धनं न इति ब्रूयुः[5] पुत्रपशवो न इति[6] । जन्यां ददामीति। प्रतिगृह्णामीति प्रतिगृह्य त्रिर्ब्रह्मदेयानि कृतेनासं न विसङ्कसेयुः । त्रिरानन्दं मागधो ह्वयेत् ॥

॥ इति वाराहगृह्ये दशमः खण्डः ॥

---

## विवाहः—प्रवदनकर्म ।

अथ प्रवदने[7] कन्यामुपवसितां स्नातां सुशिरस्कामहताऽनाच्छिन्नदशेन वाससा संवीतां संस्तीर्णस्य पुरस्ताद्विहितानि वादित्राणि विधिवदुपकल्प्य पुरस्तात्स्विष्टकृतः वाचे पथ्यायै पूष्णे पृथिव्यै अग्नये सेनायै धेनायै गायत्र्यै त्रिष्टुभे जगत्यै अनुष्टुभे पङ्क्त्यै विराजे राकायै सिनीवाल्यै कुह्वै, त्वष्ट्रे आशायै सम्पत्त्यै भूत्यै निर्ऋत्यै अनुमत्यै पर्जन्याय अग्नये स्विष्टकृते च जुहुयात् । आज्यशेषेण पाणी प्रलिप्य कन्यामुखं संमार्ष्टि—प्रियां करोमि पतये देवराणां श्वशुराय च । रुच्यै त्वाग्निस्संसृजतु रुचिष्या पतये भव । सौभाग्येन त्वा संसृज विला देवी घृतपदीन्द्राण्यग्नायी अश्विनी राड्गिला द्यौररुन्धतीति । अथ सर्वाणि वादित्राण्यभिमन्त्रयते । या चतुर्धा प्रवदत्यग्नौ या वाते या बृहत्युत । पशूनां या ब्राह्मणे न्यदधुः शिवा सा प्रवदत्विहेति सर्वाणि वा वादित्राण्यलङ्कृत्य कन्या प्रवादयते । शुभं वद दुन्दुभे सुप्रजास्त्वाय गोमुख । प्रक्रीडन्तु कन्यास्सुमनस्यमानास्सहेन्द्राण्या सवयसः सनीडाः । प्रजापतिर्यो वसति प्रजासु प्रजास्तन्वते सुमनस्यमानाः । स इमां प्रजां

---

1 उभये, जन्यापक्षीयाः कुमारपक्षीयाः. 2 तेजनीषु, आसनेषु. 3 पूर्वे, प्राङ्मुखाः. 4 जन्यापक्षीयेभ्योऽन्येभ्यश्चाचार्यः द्वौ द्वौ पिण्डौ प्रयच्छेत्. 5 जन्यापक्षीयाः जन्येति कन्यानाम. 6 कुमारपक्षीयाः. 7 वादित्रप्रवदने इत्यर्थः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रमयतु प्रजात्यै स्वयं च नोरमतां संदधातन इति प्रवदन्ति कालिकानि । कन्यामुदकेनाभिषिञ्चेत् ॥

॥ इति वाराहगृह्ये एकादशः खण्डः ॥

---

## विवाहः—अर्घ्यदानम् ।

षडर्घ्यार्हा भवन्ति—ऋत्विगाचार्यो विवाह्यो राजा स्नातकः प्रियश्चेति । अप्राकरणिकानापरिसंवत्सरादर्हयन्ति । अन्यत्र याज्यात्कर्मणो विवाहाच्च न जीवत्पितृकोर्घ्यं प्रतिगृह्णीयात् । कांस्ये चमसे वा सदभ्रि मध्वासिच्य वर्षीयसा पिधायाचमनीयप्रथमैः प्रतिपद्यन्ते । विराजो दोहोसि विराजो दोहमशीय मयि दोहः पद्यायै विराजः कल्पयतां[1] । इति एकैकमाह्रियमाणं[2] प्रतीक्षते । सावित्रेण विष्टरं[3] प्रतिगृह्य—अहं वर्ष्म सदृशानामुद्यतामिव सूर्यः । इदमहं तमधरं करोमि[4] यो मा कश्चिदभिदासतीत्येकस्मिन्नुपविशति[5] । राष्ट्रभृदसीत्याचार्य आसन्दीमनुमन्त्रयते । मा त्वा जोषं[6]मित्यन्यतरमधस्तात्पादयोर्विष्टरमुपकर्षति । विष्टरमासीनायैकं त्रिः प्राह । नैव भो इत्याह । न[7] । म आर्षेयाय इति श्रुतिः । स्पृशत्यर्घ्यं पाद्येन[8] पादौ प्रक्षाल्य सावित्रेणोभयतोविष्टरं मधुपर्कं प्रतिगृह्य अदित्यास्त्वा पृष्ठे सादयामीति प्रतिष्ठाप्यावसाद्य सुपर्णस्य त्वा गरुत्मतश्चक्षुषाऽवेक्षे इत्यवेक्ष्य नमो रुद्राय पात्रसदे—इति प्रादेशेन प्रतिदिशं व्युद्दिश्याङ्गुष्ठेनोपमध्यमया च मधु वाता ऋतायत इति तिसृभिस्संसृजति । अमृतोपस्तरणमसि इत्युपस्तरति सत्यं यशः श्रीर्मयि श्रीश्श्रयतामिति मधुपर्कं त्रिः प्राश्नाति भूयिष्ठं । सुहृदेऽवशिष्टं प्रयच्छति । अमृतापिधानमसीत्याचामति ।

---

1 विराजः कल्पतामित्येतत्. B कोशे न दृश्यते. 2 इति मधुपर्कमाह्रियमाणं—A. 3 विष्टरौ—B. 4 इदं तमभितिष्ठामि—A. 5 योमा कश्चा अभिधासति इति जपति—A. 6 दोष—A. 7 न परिषामेत्याचमनीया प्रथमाः प्रतिपद्यन्ते अमृतोपस्तरणमसीत्याचामति. 8 पाद्येन पादौ प्रक्षालयति । स्पृशत्यर्घ्यं ततः प्रणयति—.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

असिपाणिर्गां प्राह हतो मे पाप्मा पाप्मानं मे हत । यां त्वा देवा वसवोऽन्वजीविषुरादित्यानां स्वसारं रुद्रमातरं । दैवीं गामदितिं जनानामारभन्तामर्हतामर्हणाय । ॐ कुरुतेति संप्रेष्यति । चतुरवरान्ब्राह्मणान् नानागोत्रानित्येकैकं पश्वङ्गं पायसं वा भोजयेत् । यद्युत्सृजेत्—माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट । —ॐ, भूर्भुवस्स्वरों—इत्युत्सृजतु तृणान्यत्तूदकं पिबतु ॥ अथालङ्करणं ॥

अलङ्करणमसि सर्वस्मादलं मे भूयासं । प्राणापानौ मे तर्पयामि समानव्यानौ मे तर्पयामि उदानरूपे मे तर्पयामि सुचक्षुरहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति यथालिङ्गमङ्गानि संस्पृशति अथ गन्धाच्छादने वाससी परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्तु शतं जीवेम शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इत्यहतं वासः परिधत्ते[1] यदि पशुमालभते—शं नो मित्र इति पाणी प्रक्षाल्य यथार्थमालभनमित्येके[2] ॥

॥ इति वाराहगृह्ये द्वादशः खण्डः ॥

---

## कन्यादानम् ।

पश्चादग्नेश्चत्वार्यासनानि उपकल्पयीत । तेषूपविशन्ति—पुरस्तात्प्रत्यङ्मुखो दाता पश्चात्प्राङ्मुखः प्रतिग्रहीता । दातुरुत्तरतः प्रत्यङ्मुखी कन्या । दक्षिणत उदङ्मुखो मन्त्रकारः । तेषां मध्ये प्राङ्मूलान्दर्भानास्तीर्य कांस्यमक्षतोदकेन पूरयित्वा अविधवाऽस्मै प्रयच्छति। तत्र हिरण्यमष्टौ मङ्गलान्यावेदयति । मङ्गलान्युक्त्वा ददामि प्रति-

---

१ वास आच्छाद्याग्निं प्रज्वाल्य व्याहृतिभिः व्रीहियवान् हुत्वा मङ्गलान्याशासयेत्. २ गोघ्नाय वराय मधुपर्के गवालम्भनं केचित्परिजिहीर्षवः केचिच्च चिकीर्षवो वाराहगृह्यसूत्रप्रणयनकाले समासन्निति वाढमस्मात्ज्ञायते । वाराहश्रौते पतञ्जलिनाम निर्दिष्टमस्तीति पतञ्जल्युत्तरकालिकोयं ग्रन्थकर्ता निषिद्धगवालम्भनाद्याज्ञवल्क्यात्प्राचीन इति क्रिस्तवत्सरारम्भकालिकः आपस्तम्बेन १-३-१० सूत्रे गवालम्भनं विहितं न तु विकल्पितम्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गृह्णामि इति त्रिर्ब्रह्म देया पिता भ्राता वा दद्यात् । सहिरण्यान-ञ्जलीनावपति । धनायत्वेति दाता । पुत्रेभ्यस्त्वेति प्रतिग्रहीता । तस्मै प्रत्यावपति । चतुर्व्यतिहृत्य ददाति । सावित्रेण कन्यां प्रति-गृह्य प्रजापतय इति च क इदं कस्मा अदादिति सर्वत्रानुषजति कामैतत्ते इत्यन्तं । समाना वा आकूतानीति सह जपत्यन्तादनु-वाकस्य । खेरथस्य खेनसः खे युगस्य शतक्रतो । अपालामि-न्द्रस्त्रिः पूर्त्व्यकृणोत्सूर्यत्वचं[1] इति तेनोदकांस्येन कन्यामभिषिञ्चेत् ॥

॥ इति वाराहगृह्ये त्रयोदशः खण्डः ॥

---

## पाणिग्रहणम् ।

प्रागुदञ्चीं लक्षणमुद्धृत्यावोक्ष्य स्थण्डिलं गोमयेनोपलिप्य म-ण्डलं चतुरश्रं वा अग्निं निर्मथ्याभिमुखं प्रणयेत् । तत्र ब्रह्मोपवेशनं । दर्भाणां पवित्रे मन्त्रवदुत्पाद्येमं स्तोममर्हत इत्यग्निं परिसमूह्य पर्युक्ष्य परिस्तीर्य पश्चादग्नेरेकवद्बर्हिस्तृणाति । उदक् प्राक्कूलान् दर्भान् प्रकृष्य दक्षिणान् तथोत्तरान् अग्रेणाग्निं दक्षिणैरुत्तरानवस्तृणाति । अग्न्यायतनस्य मध्यमदक्षिणोत्तरप्रदेशेषु उदगग्रपूर्वाग्रान्परिधी-न्परिदधाति । दक्षिणतोग्नेर्ब्रह्मणे संस्तृणाति । अपरं यजमानाय पश्चार्धे पत्न्या अपरमपरशाखोदकधारयोर्लाजाधारायाश्च पश्चाद्यु-गधारस्य च । स्योना पृथिवि भवेत्येतयाऽवस्थाप्य शमीमयीं श-म्यां कृत्वाऽन्तर्गोष्ठेऽग्निमुपसमाधाय भर्ता भार्यामभ्युदानयति । वाससोऽन्ते गृहीत्वा अघोरचक्षुरपतिघ्न्येऽधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे । इत्यभिपरिगृह्याभ्युदानयति । उत्तरेण रथं वासो वानुपरिक्रम्यान्त-रेण ज्वलनवहनावतिक्रम्य दक्षिणस्यां धुर्युत्तरस्य युगतस्तन्मना ह-स्तात्कन्यामवस्थाप्य शम्यामुत्कृष्य हिरण्यमन्तर्धाय—हिरण्यवर्णाः शुचयः इति तिसृभिरभिषिच्यात्रैव बाणशब्दं कुरुतेति प्रेष्यति । अथास्यै वासः प्रयच्छति । या अतन्वन्यावन्या वा हरन् । याश्चाग्र्या

---

1 त्सूर्यवर्चसे.

देव्योऽन्तानभितो ततन्थ । तास्त्वा देव्यो जरसे संव्ययंत्वायुष्मन्निदं परिधत्स्व वास इत्यहतं वासः परिधाप्यान्वारभ्याघारावाघार्याज्यभागौ हुत्वा अग्नये जनिविदे स्वाहेत्युत्तरार्धे जुहोति । सोमाय जनिविदे स्वाहेत्युत्तरार्धे जुहोति सोमाय जनिविदे स्वाहेति दक्षिणार्धे गन्धर्वाय जनिविदे स्वाहेति मध्ये । युनज्मि त्वेति जातवेदसं कामं युक्तो वहेति जातवेदसं भिषजं, विश्वाग्न इति चाग्निं नक्षत्रमिष्ट्वा नक्षत्रदेवतां अहः अहर्देवतां रात्रिं रात्रिदेवतां ऋतुं ऋतुदेवतां यजेत् । तिथिं तिथिदेवतां विरूपाक्षं च । सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां । अग्निरस्याः प्रथमो जातवेदाः सोस्याः प्रजां मुञ्चतु मृत्युपाशात् । तदिदं राजा वरुणोनुमन्यतां यथेदं स्त्री पौत्रमगन्म रुद्रियाय स्वाहेति, हिरण्यगर्भ इत्यष्टाभिः प्रत्यृचमाज्याहुतीर्जुहुयात् । येन च कर्मणेच्छेत्तत्र जयान् जुहुयात् । जयानां च श्रुतिस्थां यथोक्तां ॥ आकूत्यै त्वा स्वाहा । भूत्यै त्वा स्वाहा । प्रयुजे त्वा स्वाहा । नभसे त्वा स्वाहा । अर्यम्णे त्वा स्वाहा । समृद्ध्यै त्वा स्वाहा । जयायै त्वा स्वाहा । कामायै त्वा स्वाहा । इत्यृचा स्तोमं प्रजापतये इति च । शुचिः प्रत्यङ्मुखः तां समीक्षस्वेत्याह । तस्यां समीक्षमाणायां जपति ॥ मम व्रते ते हृदयं दधातु मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व प्रजापतिस्त्वा नियुनक्ति मह्यं । इति का नामासीत्याह । नामधेये प्रोक्ते—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति हस्तं गृह्णन्नाम गृह्णाति । प्राङ्मुख्याः प्रत्यङ्मुख ऊर्ध्वस्तिष्ठन्नासीनायाः दक्षिणमुत्तानं दक्षिणेन नीचारिक्तमरिक्तेन यथेन्द्रो हस्तमग्रहीत्सविता वरुणो भगः । गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत् ॥ भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः । याग्रे वाक्समभवत्पुरा देवासुरेभ्यः । तामद्य गाथां गास्यामो या स्त्रीणामुत्तमं मनः । सरस्वति प्रेदमिव सुभगे वाजिनीवति । या त्वा विश्वस्य भूतस्य भव्यस्य प्रगायाम्यस्या अग्रतः । अमोहमस्मि सा त्वं सा त्वमस्या अप्यमोहं । द्यौरहं पृथिवी त्वमृक्त्वमसि सा;

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

माहं रेतोऽहमस्मि रेतो धत्तं तावेव विवहावहै पुंसे पुत्राय कर्तवै श्रिये पुत्राय वैधवै रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ इत्यभिदक्षिणमानीयाग्नेः पश्चात् एतमश्मानमातिष्ठतमश्मेव युवां स्थिरौ भवतं । कृण्वन्तु विश्वे देवा आयुर्वां शरदः शतमिति दक्षिणाभ्यां पद्भ्यामश्मानमास्थापयतः । यथेन्द्रः सहेन्द्राण्या अवारुहद्गन्धमादनात् । एवं त्वमस्मादश्मनोऽवरोहस्व समे पादौ प्रपूर्व्यायुष्मती कन्ये पुत्रवती भवेत्येवं द्विरास्थापयति । चतुःपरिणयति समितं सङ्कल्पेथामिति । पर्याये पर्याये ब्रह्मा ब्रह्मजपं जपेत् ॥

॥ इति वाराहगृह्ये चतुर्दशः खण्डः ॥

---

## योक्त्रबंधनम् ।

ततो यथार्थं कर्मसंनिपातो विज्ञेयः अर्यम्णेऽग्नये पूष्णेऽग्नये वरुणाय च व्रीहीन्यवान्वा निरुप्य प्रोक्ष्य लाजाप्रभृति मात्रे प्रयच्छति सजातायां अविधवायाः । अथास्यै द्वितीयं वासः प्रयच्छति । तेनैव मन्त्रेण दर्भरज्वा इन्द्राण्याः सन्नहनमित्यन्तौ समायम्य पुमांसं ग्रन्थिं बध्नाति । सं त्वा नह्यामि अद्भिरोषधीभिः । सं त्वा नह्यामि प्रजया धनेन सा सन्नद्धा सुनुहि भागधेयं । इत्यन्तरतो वस्त्रस्य योक्त्रेण कन्यां सन्नह्यति । अथैनामुपकल्पयते—शूर्पं लाजाः इषीकाश्मानं अञ्जनं चतसृभिः सतूलाभिरित्येकैकपातैककुम्भस्याञ्जनस्य सन्निकृष्य वृत्रस्यासि कनीनिकेति भर्तुर्दक्षिणमक्षि त्रिः प्रथममाङ्क्ते तथा परं । तथा पत्न्याः शेषेण तूष्णीं दिशि शलाकाः प्रविद्ध्यति । यानि रक्षांस्यभितो व्रजन्त्यस्या वध्वा अग्निसकाशमागच्छन्त्याः । तेषामहं प्रतिविद्ध्यामि चक्षुः स्वस्ति वध्वे भूतपतिर्दधात्विति । लाजाः पश्चादुपसाद्य शमीपर्णैः संसृज्य शूर्पे समं चतुर्धा विभज्याग्रेणाग्निं पर्याहृत्य लाजाधार्यै प्रयच्छति । लाजा भ्राता ब्रह्मचारी वा अञ्जलिनाऽञ्जल्योरावपत्युपस्तरणाभिघारणैः सम्पातं तावच्छन्नतीर्जुहुयात् ॥ अर्यमणं नु देवं कन्याऽग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा । तुभ्यमग्ने पर्यवहन् सूर्यां वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने प्र-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जया सह । पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं । इयं नार्युपब्रूते लाजानावपन्ति तौ । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम । इत्येवं पूषणं नु देवं वरुणं नु देवं येन द्यौरुग्रा—इत्यादय उद्वाहे होमाः जयाभ्याताना: सन्ततिहोमं राष्ट्रभृतश्च । आकूताय स्वाहेति जयाः । प्राचीदिग्वसंत ऋतुरित्याभ्यातानाः । प्राणदपानं सन्तन्विति सन्ततिहोमाः । ऋताषाडृतधामेति राष्ट्रभृतश्च । त्रातारमिन्द्रं विश्वादित्या इति माङ्गल्ये लाजाः कामेन चतुर्थं स्विष्टकृतमिति । अथैनां प्राचीं सप्तपदानि प्रक्रमति । एकमिषे द्वे ऊर्जे त्रीणि प्रजाभ्यः चत्वारि रायस्पोषाय पञ्च भवाय षड्तुभ्यः सखा सप्तपदी भव । सुमृडीका सरस्वती मा ते व्योम संदृशि । विष्णुस्त्वामुन्नयत्विति सर्वत्रानुषजति । पश्चादग्नेः रोहिते चर्मण्यानडुहे प्राग्ग्रीवे लोमतो दर्भानास्तीर्य तेषु वधूमुपवेशयति । अपि वा दर्भेष्वेव । इमं विष्यामि वरुणस्य पाशं यज्जग्रन्थ सविता सत्यधर्मा । धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां मा सह पत्या दधातु । इति योक्त्रपाशं विषाय वाससोऽन्ते बध्नाति । अनुमतिभ्यां व्याहृतिभिश्च त्वं नो अग्ने मनो ज्योतिः त्रयस्त्रिंशत्तन्तवः अयाश्चाग्ने । शमीमयीस्तिस्रोक्ताः समिधः । समुद्रादूर्मिरित्येताभिस्तिसृभिः स्वाहाकारान्ताभिरादधाति ॥ अक्षतसक्तूनां दध्नश्च समवदाय इदं हविः प्रजननं मे इति च हुत्वा इमं स्तनं मधुमन्तं धयायां प्रपीनमग्ने सलिलस्य मध्ये । उत्सञ्जुषस्व मधुमन्तमूर्मिं समुद्र्यं सदनमाविवेश स्वाहा इति परिधिविमोकमभिजुहोति । अन्नपते इत्यन्नस्य जुहुयात् वि ते मुञ्चामि रशनां विरश्मीन् इति च हुत्वा पवित्रेऽनुप्रहृत्य आज्येनाभिजुहोति । एधिषीमहीति समिधमादधाति । समिदसि समेधिषीति द्वितीयां । आपो अद्यान्वचारिषमित्युपतिष्ठते ॥ कुम्भादुदकेन पुनन्तु मा पितर इत्यनुवाकेन मार्जयन्ते । आपोहिष्ठीयाभिरित्येके । वरो दक्षिणा ॥

॥ इति वाराहगृह्ये पञ्चदशः खण्डः ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## सीमन्तः ।

सुमङ्गलीरियं वधूरिमां समेत[1] पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं[2] विपरेतन ॥ इति प्रेक्षकान्व्रजतोऽनुमन्त्रयते । अत्रैव सीमन्तं करोति । त्रिश्येतया[3] शलल्या समूलेन वा दर्भेण । सेनाहृनामित्येतयाऽथाभ्यञ्जति । अभ्यज्य केशान् सुमनस्यमानाः प्रजावरीर्यशसे अघोराः । शिवा भव भर्तुः श्वशुरस्या वदायुष्मती श्वश्रुमती चिरायुः इति जीवोर्णयोपसमस्यति । समस्य केशान्वृजिनानघोरान् शिवा सखिभ्यो भव सर्वाभ्यः । शिवा भव सुकुलोह्यमाना शिवा जनेषु सह वा जनेषु । इति । अथैतौ दधि मधु समश्नुतः । यद्वा हविष्यं स्यात्तस्य स्वस्ति वाचयित्वा समानावाकूतानीति सह दंपत्युभौ सह प्राश्नीतः ॥

॥ इति वाराहगृह्ये षोडशः खण्डः ॥

---

## रथारोहणम् ।

पुण्याहे युक्ते युञ्जन्ति ब्रध्नमिति द्वाभ्यां युज्यमानमनुमन्त्रयते—दक्षिणमथोत्तरं । अहतेन वाससा दर्भैर्वा रथं संमार्ष्टि । अङ्कौ न्यङ्कावभितो रथं ये ध्वान्ता वाताग्निमभि ये सञ्चरन्ति । दूरे हेतिः पतत्री वाजिनीवांस्ते नोऽग्नयः पप्रयः पालयन्त्विति चक्रे मन्त्रयते ॥ वनस्पते विड्ङ्ग इत्यधिष्ठानं सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं । आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्वेति आरोहयति ॥ अनुमायन्तु देवता अनु ब्रह्म सुवीर्यं । अनु क्षत्रं तु यद्बलमनु मा मैतु यद्यश इति प्राक् अभिप्राया प्रदक्षिणमावर्तयति । प्रति मायन्तु देवता प्रति ब्रह्म सुवीर्यं । प्रति क्षत्रं तु यद्बलं प्रति मामैतु यद्यश इति यथाऽस्तं यन्तमनुमन्त्रयते । अमङ्गल्यं चेत्यतिक्रामति । नमो रुद्राय ग्रामसद इति ग्रामे इमा रुद्रायेति च । नमो रुद्रायैकवृक्षसदे इत्येकवृक्षे–ये वृक्षेषु शष्पिञ्जरा इति च । नमो रुद्राय श्मशानसद इति श्मशाने—ये

---

1 समेत्य—C. 2 यथार्थं—C. 3 त्रिश्वेतया—C.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भूतानामधिपतय इति च । नमो रुद्राय चतुष्पथसद इति चतुष्पथे ये पथां पथि रक्ष इति च । नमो रुद्राय तीर्थसद इति तीर्थे । ये तीर्थानि प्रचरन्तीति च । यत्रापस्तरितव्या आसीत्—अति समुद्राय वैणवे सिंधूनां पतये नमः । नमो नदीनां सर्वासां पत्ये विश्वाह्यजुषतां विश्वकर्मणामिदं हविः स्वः स्वाहेत्यप्सु उदकाञ्जलिं निनयति । अमृतं वा आस्ये जुहोम्यायुः प्राणेऽप्यमृतं ब्रह्मणा सह मृत्युं तरति प्रासहादिति रिष्टिरिति जपेत् । यदि रथाक्षः शम्याणि वा रिष्येत अन्यद्वा रथाङ्गं तत्रैवाग्निमुपसमाधाय जयप्रभृतिभिर्हुत्वा सुमङ्गलीरियं वधूरिति जपेत् । वध्वा वधूं समेत पश्यत व्युत्क्राम पथां जरितां जवेन शिवेन वैश्वानरः इत्यस्याग्रतः[1] । आचार्यो येन येन पथा प्रयाति तेन तेन सहैत्य भावे वा व्युत्क्रामतो गोभिः सह । अस्तमिते ग्रामं प्रविशंति । ब्राह्मणवचनाद्वा ॥

॥ इति वाराहगृह्ये सप्तदशः खण्डः ॥

## गृहप्रवेशः ।

अस्मिन्नहस्सन्धौ गृहान् प्रपादयीत । प्रतिब्रह्मन्निति प्रत्यवरोहति । मङ्गलानि प्रादुर्भवन्ति । गोष्ठात्संतता मूलपराजितं स्तृतरथादध्योपसादनात् । येष्वध्येति प्रवसन् येषु सौमनसं महत् । तेनोपह्व्यामहे तेनो जानन्त्वागतं इति तयाऽभ्युपैति । गृहानहं सुमनसः प्रपद्ये वीरं हि वीरवतः सुशेवाः । इरां वहन्तीं घृतमुक्षमाणास्तेष्वहं समना संविशाम । इत्यभ्याहिताग्निं सोदकं सौषधमावसथं प्रतिपद्येत । रेवत्या रोहिण्या मूलेन वा यद्वा पुण्योक्तं । पश्चादग्नेः रोहिते चर्मण्यानडुहे प्राग्ग्रीवे लोमतो दर्भानास्तीर्य तेषु वधूमुपवेशयति । अपि वा दर्भेष्वेव । अथास्या ब्रह्मचारिणं जीवपितृकं जीवमातृकमुत्सङ्गमुपवेशयेत् । फलानामञ्जलिं पूरयेत् तिलतण्डुलान्वा ॥ अच्युता ध्रुवा ध्रुवपत्नी ध्रुवं पश्येम विश्वत इति ध्रुवं जीवन्तीं सप्तर्षीनरुन्धतीमिति दर्शयित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यं पुरस्तात्स्विष्टकृतः आज्यशेषे दध्या-

---

1 इत्यास्या—A.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सिच्य दधिक्राव्णोऽकारिषमिति दध्नस्त्रिः प्राश्नाति । चक्रीमिषाऽनडुहः पदं मामेवान्वेतु ते मनो मां च पश्यसि सूर्यं च । अन्येषु मनस्कृथा सोमेनादित्याः चाक्रवाकं संवननं तन्नौ संवननं कृतमित्यवशिष्टं पत्न्यै प्रयच्छति। तूष्णीं सा प्राश्नाति। अपराह्णे पिण्डपितृयज्ञः। स व्याख्यातः। संवत्सरं ब्रह्मचर्यं चरतः द्वादशरात्रं वा। अथास्यै गृहान् विसृजेत् । योक्रपाशं विषाय तौ सन्निपातयेत् । अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतं। इह प्रजामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकाम। अपश्यं त्वा मनसा दीध्यानां स्वायां तनूं ऋत्विये नाथमानां। उप मामुचा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे । प्रजापतिस्तन्वं मे जुषस्व त्वष्टा देवैः सहमान इन्द्रः। इन्द्रेण देवैर्वीरुधः संविदानां बहूनां पुंसां पितरः स्याव:॥ अहं प्रजा अजनयं पृथिव्यामहं गर्भमदधामोषधीषु । अहं विश्वेषु भुवनेष्वन्तरहं प्रजाभ्यो बिभर्षि पुत्रान्। इति स्त्रिया दीव्यत्या सञ्जपति ॥ करदिति भसदभिमृशति । जननीत्युपजनं । बृहदिति जातं। एतेन धर्मेण ऋताबृतौ संनिपातयेत् ॥

॥ इति वाराहगृह्ये अष्टादशः खण्डः ॥

---

## पुंसवनम् ।

अथाऽस्यास्तृतीये गर्भमासे पुंसा नक्षत्रेण यदहश्चन्द्रमा न दृश्यते तदहर्वोपोष्याप्लाव्याहतं वास आच्छाद्य न्यग्रोधावरोहशुङ्गान् उदपेषं दक्षिणस्मिन्नासिकाच्छिद्रे आसिञ्चेत् । हिरण्यगर्भोऽद्भ्यः संभूतः इत्येताभ्यां। अथाऽस्या दक्षिणं कुक्षिमभिमृशेत्—पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः। पुमानग्निश्च वायुश्च पुमान्गर्भस्तथोदरे । पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ। पुमांसं गर्भं जायस्व त्वं पुमानुपजायतां । इत्येताभ्यां ॥ अथास्याः पञ्चमे षष्ठे सप्तमे वा गर्भमासे माङ्गल्यैः स्नापयित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतः पश्चादग्नेर्दर्भेष्वासीनायाः सर्वान्केशान्विमुच्य त्वमर्यमा भवसि यः कनीनां देवः स्वधा वो गुह्यं बिभर्षि। अञ्जन्ति विश्वं सुकृतं त-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पोभिः यद्दंपती समनसा कृणोमि ॥ इति नवनीतेन पाणी प्रलिप्य सर्वान्केशान्संप्रयौति । इन्द्राणी चक्रे कङ्कतं सीमन्तं विसर्पतु इति शलल्या शमीशाखया सपलाशया एकीकृत्य कङ्कतेन—अन्तर्वत्नी पुमांसं दीर्घं जीवन्तं शतायुषं । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं इति त्रिश्वेतया सीमन्तं करोति । अथास्याः पतिर्द्वेधा केशान् बध्नाति—नीललोहितेन सूत्रेण जीवोर्णया वा ॥

॥ इति वाराहगृह्ये एकोनविंशः खण्डः ॥

---

## वैश्वदेवकर्म ।

अथ वैश्वदेवं व्याख्यास्यामः । तत्र सायंप्रातःप्रभृतीनां अग्निहोत्रवत्परिसमुह्य पर्युक्ष्य परिस्तीर्य सायं प्रातः स्यादित्येके । हविष्यस्य वा सिद्धस्य वैश्वदेवः । अग्नये सोमाय प्रजापतये धन्वन्तरये वास्तोष्पतये विश्वेभ्यो देवेभ्यः अग्नये स्विष्टकृते च जुहुयात् । अवशिष्टस्य बलिं हरेत् । दधिमधुमिश्रस्य अग्नये पुरस्तात् यमाय दक्षिणतः सोमाय पश्चात् वरुणायोत्तरतः मध्ये वरुणार्यमभ्यां ब्रह्मणे चाग्नये पृथिव्यै वायवेऽन्तरिक्षाय सूर्याय दिवे चन्द्रमसे नक्षत्रेभ्य इत्यद्भ्यः कुंभदेशे ओषधिवनस्पतिभ्यः मध्यदेशे कामाय गृहपतये इति शय्यादेशे श्रियै च रक्षोजनेभ्योऽन्तः शरणे आकाशायेति स्थलिकांडाभ्यां तूष्णीं निष्क्रम्योपरि शरणे कव्यं प्राच्यां पितृभ्यः स्वधेत्यनुषजेत् । नम इत्यन्ते च ये ब्राह्मणाः प्राच्यां दिश्यर्हन्तु ये देवा यानि भूतानि प्रपद्ये तानि मे स्वस्त्ययनं कुर्वन्विति दक्षिणस्यां प्रतीच्यां उत्तरस्यामूर्ध्वायां ये ब्राह्मणा इति सर्वत्रानुषजेत् । स्नेहवद्मांसमन्नं भोजयित्वा विदिशो ब्राह्मणानर्थसिद्धं वाचयेत् । बलिहरणस्यांते यामाशिषमिच्छेत् तामासीत । गृहपतिः ॐअक्षयमन्नमस्त्वित्याह । भिक्षां प्रदाय सायं भोजनमेव प्रातराशेत् । विप्रोष्य गृहानुपतिष्ठेत् ॥

॥ इति वाराहगृह्ये वैश्वदैविकः खण्डः ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# परिशिष्टम् ।

अतः परं परिशिष्टं मैत्रायणीयसूत्रस्य गृह्यमगृह्यपुरुषः प्रायश्चित्तानुग्राहिक–हौतृक–शुल्बिक–उत्तरेष्टिक वैष्णव–आध्वर्य-विकार्षक–चातुर्होतृक गोनामिक–अकुलपादरहस्य–प्रतिग्रहयमक–वृषोत्सर्ग–प्रश्न–द्रविण–षट्टारण–प्रधान–सान्देहिक–प्रवराध्याय–रुद्रविधान–च्छन्दोनुक्रमणी–अन्तःकल्प–प्रवासविधि–प्रातरुपस्थान–भूतोत्पत्तिरिति द्वाविंशतिः परिशिष्टसंख्यानाम् ॥

---

## पाकयज्ञाः ।

गृह्याग्नौ पाकयज्ञान् विहरेत् । ह्रस्वत्वात् । पाकयज्ञो ह्रस्वं हि-पाक इत्याचक्षते । दर्शपूर्णमासप्रकृतिः पाकयज्ञविधिः अप्रयाजानु-याजोऽसामिधेनिकः स्वाहाकारान्ते निगद्य होमाः परतंत्रोत्पत्तिर्द-क्षिणाग्नावाहिताग्निः गोमयेन गोचर्ममात्रं चतुरश्रं वा स्थंडिलमु-पलिप्येषुमात्रं तस्मिन् लक्षणं कुर्वीत सत्यसदसीति पश्चार्धादु-दीचीं लेखां लिखेत् । ऋतसदसीति दक्षिणार्धात् प्राचीं घर्मसद-सीत्युत्तरार्धात् प्राचीं मध्ये द्वे तिस्रो वा प्राचीः । ऊर्जस्वतीति द-क्षिणां । पयस्वतीत्युत्तरां । इंद्राय त्वेति मध्याद्वा सर्वाः प्रादेश-मात्र्यः दर्भेणावलिखेत् । अद्भिः प्रोक्ष्याग्निं सादयति । परिसमुह्य पर्युक्ष्य परिस्तीर्य तूष्णीमिध्माबर्हिस्सन्नह्य प्रागग्रैर्दक्षिणारंभैः उदक्संस्थैः अयुग्मैर्धातुभिस्तृणाति । दक्षिणतोऽग्नेः ब्राह्मणमुपवे-श्योत्तरतः उदकृपात्रं बर्हिषः पवित्रे कुरुते । समिधावप्रच्छिन्न-प्रान्तौ दर्भौ प्रादेशमात्रौ पवित्रे स्थो वैष्णव्य इत्योषध्या छित्वा विष्णोर्मनसा पूते स्थ इत्यद्भिः त्रिरुन्मृज्य प्रोक्षणीधर्मैः संस्कृत्य प्रणीताः प्रणीय निर्वपणप्रोक्षणसंवपनमिति यथादैवतं चरुम-धिश्रित्य स्रुक्स्रुवौ प्रमृज्याभ्युक्ष्य अग्नौ प्रताप्य अद्भिरासिच्य अच्छिन्नपत्रेत्याज्यमग्नौ अधिश्रयति । पृश्नेः पयोऽसीति आज्यं नि-र्वपति । परि वाजपतिरित्याज्यं हविश्च त्रिः पर्यग्नि करोति । देव-स्त्वा सवितोत्पुनात्वित्याज्यं श्रपयति । तूष्णीमिध्मा बर्हिः प्रोक्ष्य

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथाम्नातमभि परिस्तृणाति । परिधीन् परिदधाति । ओजोसीत्याज्यमवेक्ष्य पश्चादग्नेः दर्भेष्वासादयति । अभिघार्य स्थालीपाकमुत्तरत उद्वासयति । सकृदेवेध्ममादाय विरूपाक्षः प्रथमो होमानां ब्राह्मणमामन्त्र्य समिधमादायाघारावाघार्याज्यभागौ हुत्वा युनज्मि त्वेति च योजयित्वा नह्यति । युक्तो वह इति हविर्ज्ञायते । कामं पुरस्ताद्धुरो जुहोति युक्तो वह जातवेदः पुरस्तादिदंविधिक्रियमाणं यथेह त्वं भिषग्भेषजस्यासि गोप्ता त्वया प्रसूता गामश्वं पुरुषं सनेमि स्वाहेति । विश्वाग्ने त्वया वयं धारा उदन्या इव । अति गाहेमहि द्विषमिति नक्षत्रमिष्ट्वा देवतां यजेत । अहोरात्रमृतुं तिथिं च अभिघार्य यद्देवतं हविः स्यात् तज्जुहुयाद्यथादेवतं । यथादेवतया चर्चा आकूताय स्वाहेति जयान् जुहुयात् । प्रजापतिः प्रायच्छदिडामग्ने इति स्विष्टकृतमुत्तरार्धपूर्वार्धे जुहुयात् । मेक्षणमुपयामं पवित्रे चान्वादध्यात् अन्वद्यनो अनुमतिरन्विदनुमते त्वं भूःस्वाहेति प्रायश्चित्ताहुतीश्च । त्वं नो अग्ने स त्वं नो अग्ने मनो ज्योतिः त्रयस्त्रिंशत्तन्तवः अयाश्चाग्नेऽसीति च । इमं स्तनं मधुमन्तं धयाय प्रपीनमग्ने सलिलमध्ये । उत्संजिषस्व मधुमन्तपूर्वी समुद्र्यं सदनमाविवेश स्वाहेति परिधिविमोकमभिजुहोति । अन्नपत इत्यन्नस्य जुहुयात् । एधोस्येधिषीमहि स्वाहेति समिधमादधाति । समिदसि समेधिषीमहीति द्वितीयां । बर्हिषि पूर्णपात्रं निनयेत् । एषोऽवभृथः पाकयज्ञानां । आपोहिष्ठीयाभिर्मार्जयित्वा पर्युक्षेत । वरो दक्षिणा । अश्वं वरं विद्याद्गामित्येके ॥

॥ इति वाराहगृह्ये प्रथमः खण्डः संपूर्णः ॥

॥ इति वाराहगृह्यमेकविंशतिखण्डैः समाप्तम् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust